# 4 प्रेरणादीपः चाणक्यः



**चन्द्रगुप्तः** : आर्य चाणक्य ! शीतकालः अस्ति। जनेषुः कम्बलान् वितरतु।

**चाणक्यः** : महाराज ! इदानीम् अहं कम्बलान् मम गृहं नयामि। प्रभाते वितरिष्यामि।

**चन्द्रगुप्तः** : तथा करोतु भवान्।

(त्रयः चौराः प्रविशन्ति।)

**प्रथमः** : चन्द्रगुप्तस्य मन्त्री चाणक्यः। एतत् तस्य गृहम्।

**द्वितीयः** : अत्र तैलदीपः। समीपे पीठम्। पुस्तकानि...।

**तृतीयः** : धनं कुत्र ?

**प्रथमः** : अत्र तु नास्ति। द्वितीयं प्रकोष्ठं प्रविशामः।

**द्वितीयः** : आश्चर्यम् ! शैत्यम् अधिकम् अस्ति...।

**तृतीयः** : कम्बलाः समीपे एव सन्ति...।

**प्रथमः** : तथापि एषः महाशयः।

**द्वितीयः** : स्वयं कम्बलस्य उपयोगं न करोति।

**तृतीयः** : पुनश्च अधः शयनं करोति। आश्चर्यम् !

**प्रथमः** : तर्हि चाणक्यं पृच्छामः। ज्ञातव्यं तस्य रहस्यम्।



Get More Learning Materials Here : CLICK HERE www.studentbro.in

**द्वितीयः** : एतत् अस्माकं साहसम्!!

**प्रथमः** : आर्य! वयं चौराः स्मः। चौरकार्याय आगताः। महोदय! आश्चर्यम् अस्ति।

**द्वितीयः** : शैत्यम् अस्ति। कम्बलाः समीपे सन्ति। तथापि भवान् किमर्थम् उपयोगं न करोति ?

**चाणक्यः** : एते कम्बलाः मम कृते न, दरिद्रजनानां कृते सन्ति। यत् वस्तु अस्माकं नास्ति, तस्य उपयोगः पापम्।

**सर्वे चौराः** : अरे रे! वयं तु प्रतिदिनं पापं कुर्मः। चौरकार्येण एव उदरपूर्तिं कुर्मः। वयम् अद्य आरभ्य पापं न करिष्यामः। जयतु आर्यः।

## टिप्पणी

**शीतकालः** Time of chill winter **जनेभ्यः** to the people and for the people **इदानीम्** now **नयामि** am taking/carrying **प्रकोष्ठम्** room **अधः** under **अद्य** today **ज्ञातव्यम्** should know **कुर्मः** are doing

## Exercise

**1. Pronounce the following words correctly.**

(1) कम्बलान् (2) चन्द्रगुप्तस्य (3) तैलदीपः (4) प्रकोष्ठम् (5) शैत्यम् (6) पुनश्च (7) आश्चर्यम्

**2. Answer the following questions :**

(1) चन्द्रगुप्तः चाणक्यं किम् अवदत् ?

(2) चाणक्यः कम्बलान् कुत्र नयति ?

(3) चाणक्यस्य गृहे के प्रविशन्ति ?

(4) चाणक्यः किमर्थं कम्बलस्य उपयोगं न करोति ?

**3. Follow the example and frame sentences using the words from the brackets :**

**Illustration :** सुरेशः पुस्तकम् – सुरेशस्य पुस्तकम् अस्ति।

(1) ______________________। (महेशः, लेखनी)

(2) ______________________। (राजेशः, सुधाखण्डः)

(3) ______________________। (शैलेषः, धनम्)

(4) ______________________। (मूकेशः, फलम्)

(5) ______________________। (मनीषः, उपनेत्रम्)



Get More Learning Materials Here : CLICK HERE www.studentbro.in

**4. Follow the example given below and frame other sentences :**

**Illustration :** अहं प्रविशामि। वयं प्रविशामः।

अहं खादामि। ______________________________ ।

अहं गच्छामि। ______________________________ ।

अहं पश्यामि। ______________________________ ।

अहं पृच्छामि। ______________________________ ।

अहं पठामि। ______________________________ ।

**5. Follow the example and frame other sentences using the words from the brackets :**

**Illustration :** जनेषु: कम्बलान् वितरतु।

(1) ______________________________ । (शिक्षक:, सुधाखण्ड:)

(2) ______________________________ । (छात्र:, प्रसाद:)

(3) ______________________________ । (बालक:, मोदक:)

(4) ______________________________ । (मानव:, दीप:)

**Activity**

- Get the biography of Chanakya from the library and read it.
- Collect the inspiring events of great persons.
- Get the details of the renounce lay-men and honest who live life with minimum needs.



Get More Learning Materials Here : CLICK HERE www.studentbro.in